नं: ६८-घ

सिध्दान्त कौमुदी
सूत्रव्याख्या
युक्तिरत्नाकर:

पत्राणि २२

नं० ६८-घ

युक्तिरत्नाकराख्यो सिद्धान्तकौमुदी सूत्रव्याख्या

पत्राणि २२

५७

२२ पत्राणी

नं० ६७ - घ

सिद्धान्त कौमुदी
सूत्र व्याख्या
युक्तिरत्नाकरः

पत्राणि २२

नं. ८६घ

सि[?]का मौलवी

प्रक्रिया रत्नाकरः

२२ पन्ने



प्रक्रियारत्नाकर



श्रीगणेशाय नमः॥ अइउण्॥ वाक्ये संहिताया अनित्यत्वान्न सन्धिः॥ यद्यपि पदसमूहो वाक्य
न्तथापि पदशब्देन परिनिष्ठितमुच्यते· अत्र न केवला प्रकृतिरित्यस्यापनिष्ठितेत्यर्थान्निषे
धेन। ननु प्रातिपदिकार्थसूत्रेण न केवलेति न्यायेन सुबुत्पत्तिर्भविष्यतीति वचनग्रहणं न कर्त्त
व्यमिति वक्ष्यमाणं विरुध्यत इति चेन्न। अनुकरणे नाम्नः प्रातिपदिकत्वाभावेन प्रकृतित्वाभावात्।
न केवला प्रत्यय इत्यस्योदाहरणन्तु किमस्य परिमाणमित्यर्थे किमस्य द्वयसमिति प्रयोगो माभू
दिति। ननु प्रकृत्युद्देशेन प्रत्ययानां विधानात्केवलानामेषाङ्कथं प्रत्ययत्वमिति चेन्न। प्रत्ययस
जातीय इत्यर्थात्॥ आदिरन्त्येन। स्वंरूपमित्यनुवर्त्तते· स्वंरूपं आदेरेव गृह्यते॥ अन्त्येनेत्यप्रधान
त्वलीयानिर्देशात्। नन्वेवमत्राप्रधानत्वबोधार्थं सहयुक्त इति सूत्रेऽप्रधानग्रहणमावश्यकम्॥

तथाचोपपदविभक्तेरितिन्यायेनकथन्तत्प्रत्याख्यातम्प्राख्येइतिचेन्न।आदेरित्यस्यान्त्यासिद्धेः यद्य
प्यन्त्यस्यनिर्देशादिनापिचारणंसंभवतितथापिज्ञापकेनसूत्रप्रत्याख्यानमयुक्तम्।उपदेशोऽनु
उपदेशग्रहणंव्यर्थं·नचानुदात्तङि·तइत्यत्रानुदात्त्यर्थन्तत्·तेनचुकुटिषतीत्यत्रगाङ्कुटादिभ्यइति
ङि·त्वेपिनतङि·तिवाच्यम्।ङ·चासाविच्चङि·त्तद्इत्संज्ञकङ·कारान्तादित्यर्थात्।अकुहविसर्जनीयाना
ङ्क·ण्ठः।ननुशब्दस्याकाशदेशत्वात्कण्ठपदं·ण्ठादिस्थानत्वम्।सत्यम्·ककारादिजनकवायुसंयोगाधार
त्वात्ककाराद्याश्रयत्वमुपचर्यते·नासिकामुखान्तर्गतत्वमयुक्तम्मुखञ्चनासिकाचेतिविग्रहास्स
ङ्गतेः।नह्यत्रयवावयविनोर्द्वन्द्वस्सम्भवति·अतएवसामान्यविशेषभावाच्छूद्राभीरमित्यत्रद्वन्द्वो
नप्राप्नोतीत्याशंक्यआभीराजात्यन्तराणीत्युक्तम्प्राख्ये।एदैतोःकण्ठतालुवेतिविरुद्धेकण्ठता

ऽव्यादिरूपेण स्थानस्याकथनात्समुदितस्यैव स्थानत्वम्। ग्रामस्थादवासिन्यायेन च कण्ठत्वव्यवहारोऽपि। अ
तएव अदुहु हीत्यत्र फस्य दुकुः त्वादित्याद्येदन्स्येइतिवचनाद्वेत्युक्तौ वष्ठे स्थानानीति शिक्षावि
रोधः। वर्णेद्विधा धान्याव्यनुत्तममिति। अन्यतमादिति शेषः। निर्द्दिश्यमाने षष्ठी तेन परशब्दयोगे यस्य मा
ना अणुदित्सवर्णस्य। अस्य च्वौ धु ष्ट्री भवति मालीभवति। ननु कथमत्र दीर्घाकारस्य ईकारः। नि
र्दिश्यमानस्येति न्यायात्। एवं यस्येति च एरनेकाचः ओः सुपि अचि श्नुधात्वादावपि न स्यात्। अस्य
हलन्तुएरजित्याद्यनुवादे चरितार्थमिति चेत्सत्यम्। न भूसुधियोरिति ज्ञापकादणुदित्सूत्र
विषये निर्दिश्यमानस्येति न प्रवर्त्तते। अन्ये तु अकारत्वजातिविशिष्टे सर्वत्राकारवद्भिरस्यैव।
अण्ग्रहणं हि लोकसिद्धजातिपरस्यैवानुवादकमित्याहुः। अविधीयमानः किम्। इदमद्य इतः।

नन्वत्रपरत्वात्यणाघत्वेनततोऽन्तरङ्गत्वात्यणरूपेहलिलोपेमात्रिकस्यमात्रिकएवभविष्यति।हलिलो
पइत्यत्रहिआपीत्यस्यानुवृत्तेःफलाभावइतिचेत्सत्यम्।येननाप्राप्तिन्यायेनत्यणापवादत्वस्याधिका
त्रिमात्रःस्यात्।ननुकृतेप्यस्मिन्सूत्रेउच्चार्यमाणस्यैवप्रत्यायकतयाइकोयणचीत्यत्रदीर्घग्र
हणंनप्राप्नोति·अत्रकेचित्प्रत्याहारग्रहणेषुलक्षणमाहुः।नन्वेवंदीर्घादीनामिवलृकारस्या
पिग्रहणकशास्त्रवलादवंस्यादितिमूलासङ्गतिरितिचेत्सत्यम्।लक्षणयामूलभूतंयत्सूत्र
न्तेनैवग्रहणकशास्त्रमित्युच्यते·अत्रेदंचिन्त्यतेउच्चार्यमाणस्यैवप्रत्यायकत्वेऽपभ्रंशैःस्मा
रितानांसाधूनांबोधकत्वमितिसिद्धान्तस्यासङ्गतिः।किञ्चसञ्ज्ञाशब्देषुपूर्वोत्तरपदलोपे
कृतेएकादेशेनानुमितस्यसमुदायसञ्ज्ञिनम्प्रत्यापयतिदेवदत्तइत्येवहिसञ्ज्ञाभवति

नतुस्तनीतिसिद्धान्तस्याप्यसङ्गतिः। अत्रवार्त्तिककारोजातिपरत्वमाश्रित्यागमग्रहणमकृत्याचरस्यै
तन्मतेविधेयगतसंख्यायाविवक्षणान्नदोषः। अनुवाद्यगतायास्तुग्रहं सम्प्राप्यैत्यादविवावि
वक्षणादस्यचाविन्त्यादौनदोषः। ननुअनुवाद्यविशेषणस्याविवक्षितत्वेश्रेयांसन्त्नप्रवीयोदित्यादा
वनुवाद्यविशेषणस्यश्रेयस्त्वादेर्विवक्षणमितिसिद्धान्तासङ्गतिः। अजित्येकत्वविवक्षयासमुदा
यग्रहणान्नभविष्यतीतिनियोतणकाजितिसूत्रस्थकौस्तुभासङ्गतेश्चेतिचेदत्राहुः। अस्यच्यावि
त्यत्रसजातीयत्वात्सर्वासांव्यक्तीनग्रहणम्भविष्यतीतितत्राइदमइरित्यादावपितुल्यत्वात्।
अनुवाद्यविशेषणस्याविवक्षितत्वमेवेतिनियमइतिकौस्तुभादयः। एतन्मतेकचिद्विवक्षाध्वविन्न
तिजस्यानुरोधादेवबोध्यम्। ननुश्रेयांसीत्यत्रभ्रुत्वनुगिग्धुत्करणेनुमद्वयेद्वयोरनुस्वारयोनुस्वार

ले विशेषाभावइति भाष्यम्। तत्र ध्वादेशे एकत्वविवक्षणमयुक्तमिति चेन्न। एकाव्यक्तिरित्यस्य एकाकारइ
त्यर्थः। अन्यथा स एष इत्याद्यावेकत्वैवत्यदाद्यत्वं स्यात्। ननु द्वितीयशब्दे यवलपर इत्यत्रानुनासिकस्या
पि सैव व्यक्तिस्त्यदादीनाम इत्यत्र तु अकारप्रश्लेषो बोध्यः। स्यादेतत्। जातिपक्षे द्वयोर्नकारयोरेकत्वा
देक एवानुस्वारोस्त्विति चेन्न। जातेः पौर्वापर्य्यासम्भवादिति केचित्तन्न। घिमतीत्यत्र हल्जातेः परस्य
कित्वमिति सिद्धान्तासङ्गतेः। तस्माद्व्यक्तिघटकमूर्ध्वतारिजातो भवति श्रेयांसीत्यत्र तु व्यक्तिपक्षाश्र
यणेपि न दोष इत्येतत्तात्पर्यकम्भाष्यम्। स्यादेतत्। प्रत्याहारग्रहणेषु तद्वाच्यवाच्येलक्षणमाश्रयणेवृद्धि
सूत्रे आत् इति तात्परत्वमेव्यपदेशस्यापि तद्दीर्घप्लुतयोरविधित्वं स्यादिति चेत्सत्यम्। तत्रापि प्राथमिक
बोधविषयत्वं शक्यार्थस्यैव। अत्रापरे ऐति। अत्र च तकार इति तपरत्वम्मानम्। ननु तपरसूत्रस्य विधा

५ यकतयाअचीङ्कपदित्यत्रकृपोरोलइत्यनेनऋकारस्यऌकारोऽपियथास्यादित्येतदर्थन्तपरकर
णमन्यथारुणदीनामिवऌकारस्यापिनिवृत्तिःस्यादितिचेन्नाऌत्वस्यासिद्धतयानियमव्यावर्त्त्यत्वा
सम्भवात्।तपरस्तत्कालस्य।नन्वस्यनियमार्थत्वेअतद्इतिसमुदायस्यसञ्ज्ञात्वंकथम्।अएवइत्यनु
वृत्त्याअकारमात्रस्यसञ्ज्ञात्वादितिचेत्सत्यम्।तकारस्तत्रागन्तुकएवस्वरूपमादायार्थवत्त्वात्प्रा
तिपदिकत्वमितिकेचित्तन्न।अनुकरणस्यैवतिव्याप्तेः।तस्मात्तात्पर्यद्योतकत्वादेवार्थवत्त्वम्।अतएव
धनमादीनान्द्योतकत्वादेवानर्थप्रत्ययसञ्ज्ञा।यत्तुप्रत्ययाधिकारपाठसामर्थ्यात्तेषाम्प्रत्ययत्वमितित
न्न।हनस्तच्चयुजतुमोःपुक्इत्यादिविकारागमानामपिप्रत्ययाधिकारपाठस्यतुल्यतयाप्रत्ययत्वा
पत्तौअनर्थाश्रयणस्यैववैफल्यापत्तेःविकारागमानाम्फलाभावान्नसञ्ज्ञेत्यन्येनन्वस्यविध्यर्थत्वे

कृपू सामर्थ्य इत्यस्य ऋकारस्य पाठो व्यर्थः स्यात्। क्लृपू इति पाठेऽपि अचीक्लृपदित्यत्र उर्ऋदिति तपरक
रणेनैव ऌकारस्य ऌकारसम्भवादिति चेन्न। ऌपा ऌपण इत्यादेरसिद्धेः॰ यत्तु उपसर्ग इतीत्य
त्र पुनस्तपरकरणाद्विभक्तितकारेणेदम्प्रवर्त्तत इति चेन्न। अरित्युक्तौ ऋकारबोधनापत्तेः तस्मि
दुपदेशेऽदित्यादौ गुणनिर्देशादिति समाधेयम्। ननु तः परो यस्मादिति बहुव्रीहौ सर्वनामसंज्ञयोरि
ति वचनात्परशब्दस्य पूर्वनिपातनमुचित इति चेन्न। राजदन्तादित्वात्सिद्धेः। उक्तनिर्देशात्सर्वादीनाम्
पूर्वनिपातोऽनित्य इत्यन्ये। कश्चित्तु वासुदेवार्जुनाभ्यां वुन् इति निर्देशात्पूर्वनिपातोऽनित्यः। भूवादयो
धा। ननु धाः पश्यसीत्यादौ धा इति समुदायस्यानर्थकत्वात्कथं धातुत्वप्राप्तिः अत एवाङ्गानामित्यादौ
न नामीति दीर्घत्वम्। न चैवङ्गः रमानये इत्यादि समुदायस्याप्यनर्थकत्वात्कथं समासग्रहणं कृतं नियम

स्यतद्भावस्त्वद्इतिवाच्यम्।लोकेसमुदायस्यैवार्थवत्वात्।तथाचाङ्गनामित्यस्यार्थवत्वेपिनामित्यस्यनार्थव
त्वम्।शास्त्रकल्पितमर्थवत्वम्तुप्रत्येकमेवेतिचेत्सत्यम्।अङ्गनामित्यत्रविभक्त्यर्थःसमुदायेऽन्वे
तीतिनामशब्देनार्थवत्वम्।याइत्यनेनेतुस्त्रीत्वविशिष्टार्थप्रतिपादनादस्त्येवार्थवार्थवत्वम्।वाधातो
वासादृश्यम्प्रयोगभेदेनेतिकेचित्तन्नाप्रयोगेसतिधातुत्वम्।धातुत्वेसतिप्रयोगइत्यन्योन्याश्र
यापत्तेःतस्माद्धातुपाठादेवधातुत्वम्।यंतपम्।सञ्ज्ञीतिप्रीह्यादित्वादिभिःयेनविधिः।ननुवर्ण
ग्रहणादिकोयणचीत्यत्रेगन्तस्येत्यर्थेदुर्वारःयत्तुयणन्तआदेशइत्यर्थान्नदोषइतिकेयटस्त
न्न।विधेयस्यविशेषणत्वाभावेनतदन्तविध्यभावात्।अलोन्त्यपरिभाषयात्रनिर्वाहइत्युक्तोत्तुए
चोयवायइत्यादौसर्वादेशापत्तेरितिचेन्न।सानुबन्धवर्णपाठानेवर्णग्रहणाभावेनतदन्तविध्य

भावात्।समासविधौतदन्तविध्यभावात्स्कन्मपरमश्रितइत्यादौनसमासः।नन्वत्रकथंसुबन्तत्वंश्रितश
ब्दान्तत्वमितिचेन्न।श्रितान्तप्रकृतिकसुबन्तमित्यर्थापत्तेः।ननुसुपितिविशेषणं।श्रितादिविशेष्यमि
त्यत्रतात्पर्यग्राहकंवार्त्तिकमितिसिद्धान्तः।कथमितिचेत्.अत्राहुः।समर्थविशेषणतयातदन्तविधिः
प्राप्तः।कुम्भकारइत्यत्रसुपःप्राग्भागेनापिसामर्थ्यदर्शनादिति.ननुअनुदात्तङित्आत्मनेपदमित्य
त्रउपदेशेयोङित्तदन्तादित्यर्थः।कथंप्रत्ययविधौतदन्तविध्यभावादितिचेन्न।ङित्त्वस्यकरणत्वे
नतदन्तविधेः।विरामो।अभावोऽवसानइतिन्यासेएमइत्यत्रविसर्गःस्यात्पदावरेफस्येत्यर्थात्।ननु
सम्भवतिसमानाधिकरण्येकथंवैयधिकरण्यमितिचेन्न।नलोपस्सूत्रेऽन्तग्रहणेनक्वचिदवयवषष्ठ्याअ
पिज्ञापनात्।वस्तुतस्तुस्तुज्ञापकेनातिप्रसङ्गापादनस्यायुक्तत्वाद्रेफान्तस्यावपदस्येत्यदत्येवार्थस्त्या

त्।तस्मादन्वर्थसञ्ज्ञया सूत्रस्य प्रत्याख्यातस्य मानत्वादत्र भगवतो नाभिनिवेशादिति तत्त्वम्॰ सुप्तिङन्तम्
पदम्। अन्तग्रहणं सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तविध्यभावं ज्ञापयति॰ नच व्यपदेशिवद्भावेन केवल
प्रत्ययस्य पदत्वमप्राप्तं भूदित्यन्तग्रहणस्य फलं प्रत्ययग्रहणपरिभाषया तदन्तांशोपेन विधिरित्ये
तत्फलितार्थकथनमिति सिद्धान्तात्सुबन्तं सुप्त्वपदमित्यर्थापत्तेरिति वाच्यम्। हलि सर्वेषामिति नि
र्देशेन तस्येहाप्रवृत्तेः। ननु सञ्ज्ञाविधौ तदन्तविध्यभावे तत्रोपपदमित्यत्रापि सप्तम्यन्तग्रहणं न
स्यात्। ततश्च सप्तमीस्थत्वात्स्तम्बेरम इत्यत्रैव स्यान्न तु कुम्भकार इत्यत्र ग्रामेवासोत्यत्र प्रत्ययान्ता
इत्यर्थापत्तेरिति चेन्न। प्रत्ययसञ्ज्ञासन्नियोगेनैवाद्युदात्तप्रवृत्तेः। अनुत्पन्ने च प्रत्यये न तदन्तवि
ध्यादिकार्यमप्रयोजयति। हलोऽनन्तराः। हलः किम्। तितउभ्याम्। एतच्च संयोगान्तलोप इतित्यर्थमा

वेप्रत्युदाहरणम्॥ इको गुणवृद्धी॥ पूर्वसूत्राभ्यां गुणवृद्धिपदे अनुवर्त्य गुण इत्येवं यत्र गुणः क्रियते इत्यन्वयः।
अन्ये तु अनुवृत्तस्यैकवचनान्ततया सूत्रस्थस्य द्विवचनान्ततयान्वयो न सम्भवति। न हि देवदत्तयज्ञदत्तौ द
ण्डी कुरुतेति प्रयोग इत्याहुः। वृद्धिरेचीत्यादौ त्वेतत्परिभाषोपस्थित्या इकः स्थाने एचीत्यर्थो न भवति। अ
नुवादे परिभाषाणामनुपस्थितेः। कथं तर्हि उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येत्यत्र षष्ठी स्था
ने इति परिभाषयोपस्थित्योदात्तस्वरितयोः स्थाने यो यण इत्यर्थ इति चेन्न। तत्रान्तरङ्गत्वात्स्थानस
म्बन्धलाभात्। नन्वेवमुदीचामातः स्थाने इत्यत्राप्यन्तरङ्गत्वादेव स्थाने इत्यस्य लाभे स्थानेग्रहणं
व्यर्थमेव स्यादिति चेन्न ज्ञापकत्वाद्धि वृद्धिर्यस्याचामित्यादाविकल्पपरिभाषोपस्थितिर्न कल्पनीया। उदा
त्तस्वरितयोरित्यत्र तु शब्दप्रयोगसामर्थ्याद्द्वयोः सम्बन्धे कल्प्यमानेऽन्तरङ्गत्वात्स्थानमेव सम्बन्धो

भवति। उरण्रपर इत्यादौ स्पष्टप्रतिपत्तये स्थानपदमनुवर्त्तते। अत एवाल्लोपोन इत्यादौ यचीत्यादि अना
विशेषणत्वमित्यभिप्रेत्य यञादिपरस्यानन्तस्याङ्गस्य येन नाव्यवधानन्यायात्तकारमात्रस्य व्यवहि
तस्य ग्रहणमिति भाष्ये ध्वनितम्। नन्वेवमचो रहाभ्यां द्वे इत्यत्राचः पराभ्यामित्यंशो कथन्निर्दिश्यपरि
भाषोपस्थितिरिति चेन्न। अच इत्यनेन प्रधानस्य परस्य एव विशेषणत्वात् रेफहकारव्यवधानन्तु वच
न सामर्थ्यादाश्रीयते। षष्ठी स्थानेयोगा। अस्तेर्भूरित्यत्रान्तरङ्गत्वादस्तेः स्थाने इत्यर्थे सिद्धे षष्ठ्य
न्तमेव स्थाने न युज्यत इत्येतदर्थं सूत्रं तेन निर्दिश्यमानपरिभाषासिद्धा। नन्वेवमपि जरशब्दे जर
सभावो न स्यात्। निर्दिश्यमानस्य जराशब्दस्याभावादेकदेशविकृतन्यायेन जराशब्दो भवतीत्युक्तौ
तु किमः क इत्यत्राप्यत्यासाकच्कस्यादेशः इति कैयटासङ्गतिः तन्मध्ययतित न्यायेन किमः सत्वात्।

ङ्गं हेरत्रेत्याद्यनुवादे एवैकदेशान्यायः प्रवर्त्तते इति चेत्सत्यम्। एकदेशविकृतन्यायोऽलौकदृष्टान्तासि
द्धोऽनन्यत्वबुद्धिम्बस्तु न पतितन्मध्यपतितन्यायेन तु तद्ग्रहणमित्येवाभिदिश्यते· एवञ्च पुंवक्ता भ्यामित्य
त्र साकच्कस्यानिर्दिश्यमानत्वादादेशप्राप्तिरिति चिन्त्या। अत एव भिन्धकीत्यत्र पूर्वमकच्यात्तदानिर्दिश्य
मानस्यादेरभावाददिभावो न स्यादिति भाष्यं सङ्गच्छते· परगमास्तु फुलीभूता इति न्यायविषये त्वनि
र्दिश्यमानपरिभाषाया न प्राप्तिः। अत एव त्रेरयङि·ति न्यासे वितद्ब्रूत्यत्रातिव्याप्तिं वदन्ति। नन्वेवम्पठित्वा
विद्याद्रत्यत्र इट ईत्वमादायऽडीयापत्तिरिति चेन्न। आगमानामवयवत्वातिदेशोपि तदीयत्वमतिदेशा
भावात्· अत एव अनागमकानां सागमकाआदेशा इति भाष्यम्। तथा च तद्गत्यत्र दित्वाभावान्नादेशे तद
तिदेशः। हलि सर्वेषामित्येव निर्देशाच्च यदागमान्याये विङ्कुम्। उदस्थादित्यत्राङ्भक्तस्याटः स्थान्न

॥१८॥

४

हलेन ग्रहणाभावात् । ऋदः स्यास्त्वमोरिति न पूर्वसवर्णः । नन्वेवं न्यविशतेत्यत्राटो विकरणेन्तरङ्गतया
नेर्विधिद्वित्यात्मनेपदनापत्तिः । विशधातोर्न्नेः परत्वाभावादिति चेन्न विकरणेभ्यो नियमो बलीयानिति
परिभाषया सिद्धेः । ननु भूमताम्भाष्यकृतामित्यत्र ह्रस्वस्य पिति कृतीति तुको ह्रस्वग्रहणेन ग्रहणान्नुगा
पत्तिः । भाष्यकृतदित्यत्र जसि चेति गुणापत्तिरिति चेन्नावर्णग्रहणे यस्तागदमादिति न्यायस्याप्रसेः
आनेमुगिति ज्ञापकात् । अन्यथाऽकारस्य मुगागमोऽकारग्रहणेन गृह्येतेति सवर्णदीर्घप्रसक्तौ मुग्वि
धिर्व्यर्थ एव स्यात् । तत्र हि अङ्गस्यातो मुगित्यर्थः । न त्वादन्ताङ्गस्येति । अन्यथाऽदुपदेशाल्लसार्वधा
तुकमित्यनुदात्तत्वं न स्यात् । स हि अङ्गभक्तोऽङ्गमेव न व्यवदध्यादकारं तु व्यवदध्यादेव । ननु स्वर
विधौ व्यञ्जनस्याविद्यमानवद्भावान्नैष दोष इति चेदेवं तर्हि अग्निचित्वा नित्यादौ ह्रस्वनुड्भ्याम्मतु ॥१८॥

धिस्युदात्तत्वापत्तिः। तस्मादृजस्वरप्राप्तौ व्यञ्जनमविद्यमानवद्भवादित्येव वक्तव्यमिति स्पष्टं भाष्ये। अस्या
श्च परिभाषायां यतोऽनाव इति सूत्रेऽनावइति ज्ञापनिषेधो ज्ञापकः। यदन्तस्यादिरुदात्तः स्यात्तस्य चेन्नौ
धात्वात्परो न भवेदिति सूत्रार्थः। एतेन पराङ्गाधिकार इति न्यायादङ्गस्य विशेष्यत्वमेवेत्ययास्त
म्। चिच्छिदुरित्यत्र तु कोऽच्छस्व एवागमीत्यभ्यासस्य ग्रहणे न ग्रहणाभावाच्च ह्रस्वादिशेषः।
नन्वेतदयुक्तं स्वङ्गुलिर्दद्वदन्तवदित्यादिवत्। अवयवावयवस्य समुदायावयवत्वादिति चेदेवं तर्हि सच्छ
छस्यात्तुको न निवृत्तिरिति समाधेयम्॥ इको यणचि॥ यत्र क्रियान्तरं न श्रूयते इति भाष्यन्यायादौत्स
र्गिकसत्तादेये सति अचि सतिपरणीत्यर्थः। तथा च सिद्धसाध्यसमभिव्याहारन्यायेन निमित्तत्वम्प्रद
ति। नन्वस्तीत्यस्याध्याहारे सुद्धधियावित्यादौ कर्तृत्वापत्तिः सैवम्। तथा सत्यसामर्थ्यात्समासानापत्तेः।

ननुस्तुध्युपास्यइत्यत्रसम्प्रसारणपूर्वरूपापत्तिरितिचेन्न॰हलइतिदीर्घवचनसामर्थ्यात्स्थानिवत्वे
विभक्तिविधौस्थानिवत्वाभावेसम्प्रसारणस्थानिकस्यसम्प्रसारणत्वाभावात्॰यत्तुसम्प्रसारणपूर्वत्वे
समानाङ्गग्रहणमितिवार्त्तिकेनसमादधुस्तन्न॰शाकटकथमित्यादावुक्तदिशापूर्वत्वाप्राप्त्यातद्वचनवार्त्ति
कस्यैवप्रत्याख्यानात्।अस्य धुवावित्यत्रतुसंप्रसारणशब्देनाविहितत्वान्नपूर्वरूपप्राप्तिः।नन्वेवम्
नइत्यादौसवर्णदीर्घस्यकथंसंप्रसारणत्वमितिचेत्।ष्यङः संप्रसारणमित्यनुवर्त्यमानेपुनस्संप्रसार
ग्रहणसामर्थ्यात्तत्प्रवृत्तेः स्थानिवत्त्वात्।तेनतुल्यंक्रियाचेद्वतिरितिवतः॰तृतीयान्तात्तुल्यमित्यर्थेव
तिः स्यात्।यत्तुल्यंसाक्रियाचेदितिसूत्रार्थः।तत्रद्रव्यस्यक्रियातुल्यत्वासम्भवाद्ब्राह्मणादिशब्दानांब्रा
ह्मणकर्तृकाध्ययनादौलक्षणा।तथाचात्रस्थानिवत्कार्यंलभतइत्यर्थः।ननुकथंलाक्षणिकस्यप्र

हणं पाकादिशब्दादेव क्रियावाचकात्तु वर्त्तेः संभवादिति चेन्न पाकादिशब्दानामपि द्रव्यवाचकत्वात् तदभिहि
तो भावो द्रव्यवत्प्रकाशत इति सिद्धान्तात्। अत एव स्तोकः इत्यत्र स्तोकादिशब्दान्न द्वितीयामुक्त्वा गतो भोक्तुं
गत इत्यादौ तु धात्वर्थक्रियामादायैव लकारादयः। अत एव प्रकृत्यर्थविशेषणत्वे स्तोकं पाक इति द्वितीयापि भ
वतीत्याहुः। साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना सिद्धभावस्तु यस्तस्याः घञादिनिबंधनः इति
समासस्य तु न प्राप्तिः धातुमात्रस्य निष्कृष्यैकार्थीभावासंभवात्। ननु द्विरुक्तिः द्विर्वचनं द्विः प्रयोगो द्विरावृ
त्तिरित्यादयः कथं प्रयोगाः संख्यायाः क्रियाभ्यावृत्तिगणने इति सूत्रे साध्यस्वभावार्थक्रियाऽभावार्थक्रिया
ग्रहणात्। अन्यथा जन्मगणनेऽक्रियाया एव सम्भवति न द्रव्यस्येति किं तेनेति चेन्न द्विर्वचनेऽचीति निर्देशेन
क्रियामात्रग्रहणात्। क्रियाग्रहणं तु तत्रोत्तरार्थमहानवसदित्यत्र तु वर्त्तेः साधुत्वार्थं वह्निमान्भवितुमर्हती

10

त्यादिक्रियापदमध्याहार्य्यम्॥ महानससदृशः पर्वत इत्यत्र व्याख्यानन्तु प्रामादिकमेव॥ ननु द्व्यादित्तु
ल्यार्थन्तत्र तस्यैवेति द्वितीयं सूत्रमारभ्यत इति चेन्न॥ पूर्वत्रादिशब्दात्सषष्ठीसप्तम्योरभावेन तस्याप्य
त्वाप्राप्तेः॥ तद्धितग्रहण एव त्वस्यान्वयस्य धनमित्यादौ प्रवर्त्तते॥ एवं त्रेधा द्व्यमित्यत्राप्युपदिश्यत इ
त्यध्याहार्य्यम्॥ संख्यायाः प्रकारे धा इत्यनेन क्रियाप्रकारे धाविधानात्॥ आदेशग्रहणं त्वनु नास्ति
कस्यापि संग्रहार्थम्॥ नन्वेतदर्थमनेकाल्सूत्रात्सर्वस्येत्येवानुवर्त्यताम्॥ सत्यम्॥ आदेशपदं वाक्य
भेदेन स्थानिविनुद्धत्वाश्रयकार्य्यनिवृत्त्यर्थम्॥ वस्तुतस्त्वतिदेशस्वभावादतिदिश्यमानविनुद्धत्वा
श्रयकार्य्यं न भवति॥ अत एव रामानित्यत्र न प्रातिपदिकसञ्ज्ञा न पदान्तत्वा॥ ननु कथान्त्रयाणांस्था
निवत्वप्राप्तिरिति चेन्न॥ कार्य्यकालपक्षे तत्प्राप्तेः॥ अत एव निपातन एकाजिति सूत्रे भाष्ये॥ आद्यन्त

वदेकस्मिन्नित्यस्यपरिभाषामध्येपरिगणनङ्कृतम्पदार्थत्वादतिदेशपिपरिभाषाकार्य्यसिद्धयेइत्यव
व्याख्यातङ्कृयदेद्विर्वचनादिग्रहणेनाप्युक्तज्ञापनसम्भवाच्च· अन्यथात्रिपाद्यामन्तवत्वाप्रवृत्तौअमीढ्ढी
रपेणेत्यादौमीत्वणत्वादिकन्नस्यात्।अतएवभाष्येपूर्वत्रासिद्धेनस्थानिवदित्यस्यवाचनिकत्वमेवस्वी
कृतम्।अस्तुवायथोद्देशपक्षाभिप्रायेणद्विर्वचनादिग्रहणप्रत्याख्यानपरम्भाष्यम्।स्थानिवत्सूत्रं
तुत्रिपाद्याम्प्रवर्त्ततएवप्रत्ययइतिनिर्द्देशात्।अयन्निर्द्देशएवचकार्य्यकालपक्षमभिज्ञाययत्तुअ
न्यथाणत्वस्यासिध्यापदत्वंनस्यात्।यथोद्देशपक्षस्तुपूर्वत्रासिद्धइतिसूत्रानुवादएव।अदर्शनम्।
असक्तस्येतिकिम्।दधिमधुननुकृताधातोरार्द्धेपेणक्ङ्स्वान्तस्यधातोस्तुग्विधानात्कथमत्रप्रवृ
त्तिरितिचेदत्राहुः।आशिसस्यशाद्वेऽन्वयेमानाभावइति।वस्तुतस्तुक्ङ्स्वएवागमीनतदन्तः।अतएव

वृत्रहभ्यामित्यत्रसन्निपातपरिभाषयानुकोऽप्राप्तौकृतेतुग्रहणम्प्रत्याख्यातम्भाष्ये।ह्रस्वभक्तोहितुक्
स्वयमेवनव्यवदधाति।ह्रस्वान्तमङ्गन्तुव्यवदध्यादेवानन्वचययवावयवोऽपिसमुदायम्प्रत्ययवयययययए वेतिकेचि
त्।यदागमाइत्यस्ययमुद्दिश्यागमाविहितास्तद्ग्रहणेनगृह्यन्तइत्यर्थः।अतएवसम्प्रयोगोवानष्टाधस्तद्
ग्धरथवदितिपक्षेदारयतीत्यत्रपश्वादेष्फागमेकृतेऽपिदारयतीत्यादिवद्वृस्सञ्ज्ञानभवतीत्याहुः।एतत्त
न्मतेशेरतेइत्यत्रशीङःसार्वधातुकेगुणोनस्यात्।नत्वादेशस्यातोनुडागमोविहितमेवनव्यवदध्यात्सार्व
धातुकन्तुव्यवदध्यादेवाननुह्रस्वान्तस्यधातोरित्यर्थेऽपिपूर्वोक्तरीत्यासंनिपातविरोधोऽस्त्येवसहि
धातुभक्तोऽङ्गंव्यवदध्यादेवेतिचेत्तथाहिसतिधातोरिवाङ्गस्यारूपेधातोरङ्गस्येत्यर्थःद्वित्वन्तुगायास्न
मेवासङ्गतंस्यात्।संयोगान्तस्याद्विर्वचनेन।हविष्महार्थमन्तर्ग्रहणम्।ननुकथंवृद्धीनाविनिमित्तंवृद्धि

निमित्तमिति भाष्यस्वरसात् विगृहीतमिति चेन्नावृद्धेस्तद्धितस्येत्येवं वृद्धिरूपतद्धितस्याभावात्सिद्धेर्निमित्तग्र
हणसामर्थ्यात्। यणः प्रतिषेध इति। अत्र परसूत्रयस्य यस्यानुरोधादेव व्यवस्था। यत्तु अमो मशीति संयोगा
न्तलोपेन मकारान्तरम्प्रश्लिष्य भाष्ये शकारप्रत्याख्यानान्मकारादीनामसिद्धोपद इति तन्न। मकारप्र
श्लेषेऽपीमित्यत्राप्युक्ताय्यश्च इड्भ्यस्यादिति तस्य भाष्य एव प्रत्याख्यानात्। नाजानन्तर्य इति परिभाषा षत्व
तुकोरसिद्ध इति सूत्रेण ज्ञापिते इति बहवः। तत्र षत्वेऽन्तरङ्गे बहिरङ्गे पोरसम्भवात्तु यन्ग्रहणमेव ज्ञापक
म्यो ध्यम्। इयन्तु परिभाषा भाष्येन क्वचिद्विसम्भविता। अत एव पद्येत्यत्र परयणादेशस्यासिद्धत्वात्पूर्वे
यणिति भाष्यम्। एतेनैतदर्थमन्तरङ्गम्पूर्ववदिति परिभाषान्तरं स्वीकुर्वन्तोऽपि परास्ताः। अयजे इन्द्रमि
ति तु पदसंस्कारेण सिद्धम्। षत्वतुकोरिति बहिरङ्गपरिभाषाया अनित्यतामात्रं ज्ञापयितुम्। स्तुष्टुपा

स्यइति।नन्वत्रदकारस्यापिद्विर्भविष्यतिचेत्।पूर्वत्रासिद्धमद्वित्वइत्यसिद्धत्वाभावात्।यस्तुपूर्वत्रासिद्धमद्वित्वइ
त्येतत्सदविषयम्भाष्येतथैवोदाहृतत्वादितितन्न।पूर्वत्रासिद्धमद्वित्वइतिन्यायेनषत्वंकृत्वाविप्रुषुयत्तुरि
त्यस्यभाष्यएवोदाहृतत्वात्।द्विर्वचनेपरसवर्णत्वंसिद्धंवक्तव्यमितिवचनात्।वर्णद्वित्वेपूर्वत्रासिद्धमद्वित्व
इत्यनित्यमित्यन्येइतिकेचिदाहुः।विकारभेदाल्लक्ष्यभेदोनभवति।अवोढामित्यत्रपुनरोकारस्यनवृद्धि
रितिभाष्यात्।एकस्यांव्यक्तावितिपरिभाषात्तुसमोमल्लोपेपुनर्द्वित्वेनत्रिसकारकरूपसिद्धेःसमःसु
टीतिसूत्रेणज्ञापिता।ननुविकारभेदेनलक्ष्यभेदाभावेकथंप्रोहतेइत्यत्रोपसर्गाद्ध्रस्वऊहतेरितिह्र
स्वमाशंक्यएङ्इत्यनुवृत्त्याभाष्येसमाहितम्।किञ्चहलन्तस्याङ्गस्यैकत्वादस्तुतत्रलक्ष्यैक्यम्।अत्र
तुधकारदकाररूपव्यक्तिभेदएवेतिचेन्न।धकारदकारयोरुभयोरपिभष्प्रसक्त्यादोपात्ततयालक्ष्यभे

दाभावात्। अत एव इको गुणवृद्धी इति सूत्रभाष्ये अमार्ड्ढित्यत्रादौ भाष्ये वृद्धिर्वारिता तत्रापि मृजशब्दे नैव प्रा
प्तेः। किमर्थन्तर्हि पुनरित्यत्र न सम्प्रसारण इति निषेधः क्रियत इति चेन्न। परस्यैव यणः सम्प्रसारणम्पू
र्वस्य निषेध इति सिद्धान्तसिध्यर्थत्वात्। अन्यथा ध इत्यस्य तु प्रत्याख्यातत्वान्नतेनात्र निर्वाहः। अदमुय
ङ् इत्येतदर्थन्तस्यारम्भे तु न सम्प्रसारण इति भाष्ये प्रत्याख्यातमेवा येन नाव्यवधानन्यायेन परस्यैव
भविष्यतीति तु न शङ्क्यम्। प्रत्ययस्याङ्गांश एवोपस्थिताविद्धत्वात्। कथन्तर्हि भिनत्तीत्यादौ येनाव्यवधा
नन्यायादनेकव्यवहितस्येको न गुण इति सिद्धान्त इति चेत्सत्यम्। तत्राङ्गस्येको गुण इत्यर्थादङ्गम्प्रति प्रधा
नमिकस्तस्यैव विशेषणं सार्वधातुकादि। नन्वेवं कथं तदयवादपक्षे अनेनिजुरित्यत्र जुसिचेति गुणपत्ति
रुक्ता। सत्यम्। तदपवादपक्षेऽपि कोस्तु भाष्ये स्वीकृत एवानन्तु क्ङिति चेत्यत्र निमित्तसप्तम्याश्रयणं क्ङिम

थम्प्रत्ययेनाङ्गस्याक्षेपात्। ङ्कित्परं यदङ्गमित्यर्थे छिन्नं भिन्नमित्यादौ व्यवधानेपि निषेधसिद्धिरिति चेन्नानेनि
केइत्यादावभ्यासस्यापि निषेधापत्तेः। नचइगादि विशेषणेऽङ्गांशे कथं विशेषणसम्भावना अप्रधानत्वा
दिति चेत्सत्यम्। अङ्गत्वप्रत्ययत्वयोः स्वभावत एव साकांक्षत्वेनोक्तन्यायाप्रवृत्तेः। गुणः छलात्मसंस्कारइ
तिन्यायोप्यत्रानुसन्धेयः प्रत्ययस्यादित्यत्र तु आपीति नाङ्गस्य विशेषणमुक्तन्यायविषयत्वात्। तेन स्थ
कथेत्यादावित्वं नप्रोहतइत्यत्र तु बहिरङ्ग परिभाषया सिद्धमिति भाष्य एव स्पष्टम्। उभयत आश्रयेऽन्ता
दिवत्त्वाभावाद्यातस्य लोपः। लोपशिति न्यासेन सिद्धेस्तस्य ग्रहणं व्यर्थम्। ननु इह न्वाययुंसीति वाच्ये
रश्वेति सूत्रेण ज्ञापितया नानर्थइति परिभाषया सर्वादेशः सिद्ध इति चेन्न। तस्यानिष्फलत्वात्। वां
तोपि। यस्मिन्विधिरिति वार्त्तिकेन तदादिविधिः। कृतीत्यत्र तु अदादौ इति नार्थः। अतः प्रत्ययस्य ग्रह

णत्वात्। स्यादेतत्। वर्णग्रहणे शब्दरूपं विशेष्यमाश्रायतदन्तविधिविघ्नकाराभावादित्यर्थस्यापि सम्भवेन वर्णग्र
हणे भावात्प्रत्ययग्रहणं व्यर्थमिति चेन्न। वर्णग्रहणे इति वार्त्तिकेन तदन्तविधेः स्वीकारेपि मानाभावात्। ई
दूदेद्द्विवर्णग्रहणे तदन्तग्रहणादीदूदेद्द्विवचनमिति सुवचम्। मीणीवोष्ट्रस्येति। प्लुतः प्रकृतिभावश्च सर्वोपि
चक्रिवर्मणमतेनास्तीति मनोरमायाम्। व्याख्यातत्वादत्र दोषश्चिन्त्यः। निपात एकाजाएकग्रहणं ज्ञापय
ति वर्णग्रहणे जातिग्रहणमिति। नन्वेवं प्रचिकीर्ष्य गत इत्यत्र ल्यपि लघुपूर्वादित्ययादेशप्रसङ्गः। अत्राहुः
जातिग्रहणेपि द्वयोरेव ग्रहणमिति। ननु तथापि भयजइन्द्रमित्यत्र द्वयोरिकारयोराकुलापत्तिरिति चे
न्नापदसंस्कारेण सिद्धेः। अतो रोर। धिकः अर्च्य इत्यनयोः पदयोः प्रथगन्वाख्याने कृतेपि पदान्तरसम्ब
न्धे कृते प्राप्तमुत्वन्तु र्वारिं विसर्गस्यापि स्थानिवद्भावेन रुत्वा। शिवः अर्च्य इति प्रयोगस्तु संहितायामपि

14 वस्तया॰ न चावसानत्वमङ्गात्कथं विसर्ग इति वाच्यम् ॥ जातः संस्कारो न निवर्त्तत इति न्यायात् ॥ अत
एव धावयं च स्कुड्यह न्तुमिति प्रयोगः ॥ अस्फलव्यूह परिभाषा तु नास्त्येव॰ अत एव मुखनासिकावचनं य
स्येति विग्रहः ॥ पदसंस्कारमाश्रय गुङ्गं घयाद्इति न प्रयोगः ॥ गुण एव चनानामाश्रयतो लिङ्गवचना
नीति सिद्धान्तस्य विशेषणानां चाजातेरित्यत्र व्यवस्थितायितत्वात्॰ संस्कृतमप्रसादइति न्यूत्सन्या
यविषयत्वात् सौत्रत्वाद्वा साधनीयम् ॥ ननु देयाः सन्तीत्यत्र कथं विसर्जस्य यत्वप्राप्तिः देवदत्तह
न्त्यहतन्यायेन स्थानिभूतयोरभावात्॰ अत एव अमुनाइत्यत्र नाभावे रुशब्दवुद्यारीर्घस्य दित्सि
यास्तमिति चेन्न विसर्जस्येयत्नुघुच्छाय त्वाप्राप्तेः ॥ मनोरथइत्यो ल भावरूपस्य लोपस्य स्थानिबु
द्धापि नोत्वप्राप्तिरिति युक्तैव तत्र तन्यायप्राप्तिः ॥ अत एव नरवमिन्नइत्यादावुच्चारणप्रसङ्गः रूपष

स्वार्थभावादैसोऽग्नास्याप्रत्ययलोपइत्यत्रलक्षणग्रहणमन्यार्थमेवेतिवदन्ति॰ एतेनपौर्वापर्य्यमिवस्था
देशाभावोपिवुद्धिक्लृप्तइत्ययास्तम्॥ अन्येतुउच्चारणप्रसङ्कूरूपमुख्यंस्यानित्वंरेफस्यैवसम्प्रतिनतु
तुशब्दस्येत्याहुः॥ सतमस्सुटिमःसुटीतिनोक्तम्॥ प्रत्ययाप्रत्यययोरिति॰ अर्थवद्ग्रहणइतिपरिभाषाभ्यां
सुटःप्रत्ययस्यग्रहणन्नप्राप्तेः॥ पदान्तस्येत्यधिकारेपि अवयवषष्ठ्या अपिवहुशःस्वीकारात्॥ नहि
वुद्धिक्लेशोनदोषायेतिराजशासनमस्ति॰ अतएवनपदान्ताट्टेतिसूत्रेटोरनुट् इतिनसूत्रितनुड्ग्रहणा
नार्थमनेकविषयपर्य्यालोचनेक्लेशात्॥ अर्थवत्॥ अप्रत्ययइतिपर्युदासेनार्थवत्वंलभ्यते॥ पाचकइत्या
दौस्वार्थिकानांप्रकृत्यर्थेनैवार्थवत्वात्॥ नचैवमग्र्यामणितरेन्यत्रजातिलक्षणङीषापत्तिरितिवाच्य
म्॥ नित्यस्त्रीत्वात्॥ नन्वेवंकुमारितरेत्यत्रवयोवाचिनोङीषुस्यादितिचेन्न॥ कुमारशब्देनैववयोविशि

श्च स्त्रीत्वस्योक्तत्वात्यनश्चाप्लुकुटीरइतिवल्लिङ्गान्तरनिग्रस्तयेक्रियते। यस्मात्प्रत्यया प्रकृत्यादिप्रत्येङ्ग
मिति न सूत्रितम् प्राचीनपठितप्रत्ययग्रहणपरिभाषाया अस्तिद्धापत्तेः। स्त्रीइयतीति। यस्माद्घजादि
विधिरित्यर्थान्नि भत्वप्राप्तिः। तस्मादनत्कीत्यादौ अतो दीर्घो यञि भीत्यस्य वारणाय विधिग्रहणम्। सर्वना
म्नः। सर्वादिस्मैइति सुवचम्। यानि सर्वनामानि तान्येव सर्वादीनीत्यर्थेन सिद्धेः। एवमुपसर्जने सर्वना
मसंज्ञाया न प्राप्तिः। गौणमुख्यन्यायात्। एतन्मूलक एवाभिव्यक्तपदार्था ये इति न्यायः। ननु गौणमुख्य
न्यायः परकार्य्यविषयो न प्रातिपदिककार्य्यविषयः सिंहो माणवक इत्यादौ माणवपदेन सामानाधिकरण्ये
सत्येव गौणत्वप्रतीतेः। अत एव पन्थानमात्मन इच्छतिपथीयति ततः क्विपि पन्था इति रूपम्मनोरमा
यां स्वीकृतमिति चेत्सत्यम्। विशिष्टरूपोपादाने सर्वत्र गौणमुख्यन्यायः प्रवर्त्तते। अत एव युष्मद्युप

दइत्यादौ सञ्ज्ञायाञ्च युष्मदादिकार्यन्न भवति पथिशब्दे तु इतोदिति तपरकरणादयन्न्यायो न प्रवर्त्तते
।अन्ये तु गौणमुख्यविभागो लौकिकार्थनिबन्धनः। लोके च पदमेवार्थवदिति पदकार्य्येष्वेवायन्न्याय इत्या
हुः। यत्तु आरोपितस्यार्थवत्त्वस्येव गौणमुख्यविभागस्यापि प्रातिपदिकेषु सम्भवाच्चिन्त्यमेतदिति तन्न।
गौणमुख्यविभागस्य केवललोकाधीनत्वेन कल्पितस्य ग्रहीतुमशक्यत्वादिति चेदत्राहुः। द्विविधं गौणत्व
मप्रसिद्धत्वरूपं सदृशलक्षणयाऽर्थबोधकत्वरूपञ्च। तत्राद्यमादाय विशिष्टरूपोपादाने सर्वत्र तन्न्याय
प्रवृत्तिः। अत एव सञ्ज्ञाश्वशुरस्यापत्ये राजश्वशुरादिति यन्न द्वितीयमादाय तु गौणमुख्यन्यायः पदका
र्य्यविषय एवेति सिद्धान्तः। अत एवाऽमहान्महान्भूतो महद्भूतश्चन्द्रमा इत्यत्राऽऽत्वन्न। पूर्वस्मादपि विधा
विति। परिगणय्येति भाष्यप्रयोगात्पञ्चमो समासोऽनित्यः। निष्ठायां सेडिति सेड्ग्रहणन्तु व्यर्थमेव वि

18

हितविशेषणत्वेसिद्धेः॥अष्टन्।अवर्णस्तुव्यभिचरतयेक्रियमाणंत्वन्त्यचोभेदेनोपादानमर्थवद्ग्रहणपरिभा
षायाऽनित्यत्वंज्ञापयतीतिकेचित्तन्नप्रत्ययाप्रत्यययोरितिपरिभाषयावर्णस्तुरप्राप्तेः।केचित्तुतस्या
अपिअनित्यत्वंज्ञापयन्ति।भाष्येतुक्कचिदप्यस्याःस्माभ्यारोनदृश्यते।किन्त्वङ्गस्येतिसूत्रेपाठमात्रम्॥
अतएवषष्ठ्यन्तस्यार्थेतिप्रत्ययग्रहणम्।नचतदनुबन्धकस्यावर्णस्तुरेवग्रहणापत्तिः।अननुबन्धा
नुच्चारणएवतत्प्रवृत्तेः।यत्तदेतेभ्यइतिनिर्देशात्प्रकृतिवदनुकरणमितिवैकल्पिकमितिकेचित्
तन्न।एकशेषप्रकृतिस्वरूपापरिज्ञानप्रसङ्गात्।तस्माद्भुवोवुगितिनिर्देशादितिवाच्यम्।स्वद्धेति
पूर्वान्तवद्भावेनप्रातिपदिकत्वम्परादिवद्भावेनलिङ्गबोधकप्रत्ययत्वम्।तस्मान्निर्देशादिशेत्यादावे
तस्मात्तिर्युक्तेतिचेन्न।लिङ्गविशिष्टस्यापिप्रातिपदिकत्वमित्यर्थेनपूर्वान्तवत्त्वस्यानपेक्षणात्॥

नमुनेः। सन्निपातपरिभाषयाऽमुनेत्यस्यसाधनमयुक्तंदशाब्दवृद्ध्याटाङसीतिइनादेशापत्तेः। अमुकशब्दस्या
प्युत्पन्नत्वेपिसर्वादिकार्य्यन्दुर्ल्लभम्। ननुऊनुयाइत्यत्रदीर्घवारणायङ्क्ङितीत्यनुवर्त्ततितत्कथंऽयायानि
त्यत्रा। ऊत्सार्वधातुकयोरित्यस्यप्राप्तिःसत्यम्। छान्दसत्वाऽनुनुपेत्यत्रनदीर्घः। ननुअभ्युद्धरतीत्यत्र
द्वयोरुपसर्ग्गयोःकथम्पूर्वप्रयोगः। तेप्राग्धातोरितिनियमादितिचेत्सत्यम्। अनुकरणस्यानितिपरमि
तिसूत्रेऽनित्यत्वाविति वाच्येपरगतहणमस्मिन्प्रकरणेजातिनिर्द्देशज्ञापनार्थम्। ननुकथन्नीलोत्पलमि
त्यादौसमासः। अधात्वभितंसमानाधिकरणमसमर्थवदितिभाष्योक्तेः। पाचकश्रात्मइत्यादौसूत्रस्य
चारितार्थ्यादितिचेन्न। विशेषणपूर्वनिपातार्थेनपोटायुवतीत्यादिसूत्रेणसमाससज्ञापनात्। अतएववव
नसामर्थ्यादत्रसमानाधिकरणमसमर्थवदितिनप्रवर्त्ततइतिभाष्यम्। यत्तूक्तभाष्यादपराध्यापकइत्यत्रव

17

हुल्लग्रहणान्नसमासइतितन्नयोरापुवतीत्यादिवचनसामर्थ्यादित्यर्थात्। एतेनतस्सकस्यसर्थ्यस्येति
प्रत्युदाहरणमसङ्गतम्। यत्तुषोगीयमानस्येत्येवप्रत्युदाहार्य्यमित्यपास्तम्। समानाधिकरसामर्थ्या
त्प्रथमान्तेनविग्रहेपितस्यैकसर्व्वस्येतिनप्रयोगः। कथंतर्हिपूर्व्वपदार्थउत्तरपदार्थइत्यादौसमासइति
चेन्न। अन्येकमन्यपदार्थेतिनिर्द्देशानेकचित्समासस्यापिज्ञापनात्। ननुनीलश्चतदुत्पलञ्चेत्यादौ
चार्थसत्वाद्द्वन्द्वापत्तिरितिचेन्न। एकसञ्ज्ञाधिकारेतत्पुरुषसञ्ज्ञयाबाधात्। ननुपूर्व्वपदंपूर्व्वसूत्रमि
त्यादौकथंसमासः दिक्संख्येसञ्ज्ञायामेवेतिनियमादितिचेन्न। पूर्व्वादिशब्दानामत्रकालवाचकत्वा
त्। पूरणगुणेत्यत्रतत्स्थैश्चेतिवार्त्तिकात्। नूपुरसगन्धसंयोगविभागादीनामनिषेधः। जलमाधु
र्य्यम्भाजतीसौरभम्पितयातिमेत्यादीनाङ्गतिस्तुचिन्त्या। यत्तुसञ्ज्ञाप्रमाणत्वादितिनिर्द्देशादनित्यो

यमितितन्न्नात स्यश्चेतिवार्त्तिकबलादत्रनिषेधस्याप्राप्तेः।जात्याख्यायामुब्राह्मणैःपूज्यइत्यादावेकत्वस्यजा
त्यभिप्रायकतयातत्रब्राह्मणैःपूज्याइतिबहुत्वसिद्धयेसूत्रं यत्किंबहुत्वमादायतुसूत्रमप्रत्याख्यातम्भाष्ये
।एतन्मते एकस्मिन्ब्राह्मणेएतेब्राह्मणाइतिप्रयोगस्यासाधुत्वं लभ्यते।गुर्वादिपदानोपादिनात्तुकथञ्चिञ्चि
यद्विमुपवयम्ब्राह्मणइत्यत्रोद्देश्यविधेयभावेनयोधात्सविशेषणानामितिनिषेधोन।ज्ञानार्थमित्यादौसध
त्वप्रकृतत्वान्नपुंसकत्वस्योन।अन्तरङ्गानपतिन्यापडत्स्सर्ज्जतिःसामासिकत्वुविषयः।अतएवतत्कु
लमित्यत्रत्यदादिभ्यश्शुजितिवचनमारब्धम्भाष्येनानुजानातीत्यादौवत्तोदीर्घोयभीत्यनेनदीर्घेजा
नाममोइत्यादौप्लुतोनस्यात्।असत्यमुद्ज्ञापकपरभाष्यप्रामाण्येनप्लुताभावात्।किञ्चअनन्त्यस्यापि
प्रश्नास्यानयोस्तित्यस्यानन्त्यस्यचपरस्यप्लुतइत्यर्थः।कथंतर्हिस्याद्घोरिच्चेतितपरकरणम्प्लुताभा

वार्थमित्युक्तम्भाष्ये। अत एव प्लुतप्राप्तिश्चिन्त्येत्युक्तं कैयटेन। ननु लोपागमवर्णविकारज्ञ इति भा
ष्ये पृथगुपादानात् लोपो न विकार इति चेन्न। छिन्नपुच्छ्यादिदृष्टान्तेन भाष्ये साधितया लोपस्यापि
विकारत्वात्। अर्द्धविकारे तु सोयमिति प्रत्यभिज्ञाविरहान्नैकदेशविकृतन्याय इति केचित्। तन्न।
नाशातिरिक्ते सर्वावयवविकारेपि सोयमिति प्रत्यभिज्ञादर्शनात्। नन्वस्यापत्यमित्यत्र लोपस्यै
कथन्तन्न्यायप्राप्तिः। लोकेपि ह्यङ्गादिनाशेऽश्वस्येदं शरीरमित्येव व्यवह्रियते न त्वश्वोपमिति चेत्।
सत्यम्। एतदर्थमेवादेशग्रहणादियं साधितं भाष्ये। एकशब्दश्चात्रावयववाची। एकदेशिनैकाधिक
रणे इत्यादौ तथादर्शनात्। ननु कार्य्यादिरीडत्यादयः कथं प्रयोगाः एकाक्षरात्कृतो जातेः सञ्ज्ञायाञ्च
न तौ स्मृताविति निषेधादिति चेन्न। तदस्यास्त्यस्मिन्निति लीति शब्दस्य विवक्षार्थतया क्वचित्तत्त्वम्

वाह्यासमासान्ताः। ननूत्तरपदावयवत्वेदृस्प्रथमकावृत्यत्रद्वद्मेतत्तद्भ्यः प्रथमपूरणयोरिति कपडसात
त्वापत्तिरितिभाष्यात्समासस्यान्तइतिलभ्यतेऽकृतद्वन्द्वानामेकशेषेक्रः क्क क्रः क्क क्रैः चावित्यत्रसमासा
न्तेऽकृतेवैन्नूप्याद्रेकशेषोनप्राप्नोतीतिभाष्यादुत्तरपदावयवत्वमेवलभ्यतेइतिचेन्न। उत्तरपदस्यप्रथम
इतिस्वरूपस्येत्यर्थेननिर्वाहात्। कविशिष्टस्यहिउत्तरपदत्वमेवव्यपदिश्यतेनकवन्तस्यप्रथमशब्दत्व
मपिलभ्यानुरोधेनैवद्वयोस्त्रीकाराद्यासुलभमिति। उपसर्गात्खल्घञोरितिनुमप्राप्तोनसुदुर्भ्यांके
वलाभ्यामितिनिषिध्यते। अतिसुलभमित्यत्रतुअतेः कर्मप्रवचनीयत्वेनानुपसर्गत्वान्नदोषः। अत्रवदन्ति
यद्यपिपरस्परसहितौसुदुरावित्यर्थस्तदासुलभइतिनस्यात्। निरपेक्षावित्यर्थेतुउपसर्गान्तरस्येवसुदु
रोरपिव्यावर्त्तनात्सुदुर्लभमित्यपिनस्यादितिदिक्। संख्यान्वितद्रव्यमप्रानन्वेवमप्यद्वादिशब्दानामपिद्रव्यत्वाप

॥१९॥ 19

तौ गुणवचनादिति ङीषनापत्तिः। यदित्वपान्डूयवाचित्वन्नस्त्रीक्रियते तदा स्तोकेन यथा इत्यादौ करणे
च स्तोकाल्पकृच्छ्रकतिपयस्येति पञ्चमीनिषेधो न स्यादिति चेत्सत्यम्। गुणमुक्तवान्गुणवचनः गु
ण प्रवृत्तिनिमित्तक इत्यर्थः। ननु गुणस्य यदि प्रवृत्तिनिमित्तत्वन्तदा जातिरेव शब्दार्थ इति प्रवाद वि
रोध इति चेत् न समानमेव हि प्रवृत्तिनिमित्तं समान्यन्नाम समानो धर्म्मः। स च शुक्लादिशब्दे गुण एव
पाचकादिशब्दे क्रियैव घटादिशब्दे जातिरेव। अत एव चतुष्टयी शब्दानाम्प्रवृत्तिरिति पुवादः। ननु घट
पटादिनिष्ठानां शुक्लादिगुणानां क्रियाणां च भिन्नत्वात्कथम्प्रवृत्तिनिमित्तत्वमिति चेन्नादर्पणस्था
ङ्गादौ मुखस्यैव आश्रयभेदादारोपित एव भेदः। गुणक्रिययोनुत्पादविनाशव्यवहारोपि तत्तत्सम्ब
न्धस्यैव। अन्ये तु संबन्धानित्यत्वेन व्यवहारो नानुभवसिद्धः। अन्यथा घटादीनामपि नित्यतापत्तेः॥

॥१९॥

तस्माद्गुणादिद्वारा जातिवाचिना गुणशब्दत्वं साक्षाज्जातिवाचकानां जातिशब्दत्वम्। एव गुरुत्वादिष्वि
पि बाल्याद्यवस्थाभेदाद्भिन्नेषु डित्थत्वादिकं जातिरेव। एवमाकाशत्वादिकमपि जातिरेव। ननूक्तं हरिणा
संयोगिद्रव्यभेदेन भेदश्च परिकल्पिते। तेषु देशेषु सामान्यमाकाशस्याविवक्षित इति। अत एव सर्वेश
ब्दा जातिवाचका इति प्रवादः। आकृतिग्रहणा जातिरिति पक्षे कुमारी भार्य्य इत्यत्र जातेश्चेति पुम्व
द्भावप्रतिषेधः। नन्वेवं पुत्र जातिरित्यत्रापि पुम्वद्भावप्रतिषेधः स्यात्। ब्रह्मा स्थविरा इत्यत्र जातिल
क्षणे ङीप्च स्यादिति चेत्। एतदर्थमेव भाष्ये लक्षणान्तरमुक्तम्। प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः
असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुरिति। सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां या आविर्भाव
तिरोभावौ लभत इत्यर्थः। अस्मिन्मते जातिर्नित्यैव अनयोश्च पक्षयोर्लक्ष्यानुरोधाद्व्यवस्था। अत

एवयुवतितरेत्यत्रतसिलादिष्विति पुम्वत्त्वं। ननुत्रयीपक्षे संज्ञाशब्दानामपिजातित्वाद्देवदत्तेत्यत्र
ङीष्प्रसङ्ग इतिचेन्न। सत्यम्। जातेश्चेतिसिद्धे संज्ञापूरणयोश्चेतिसंज्ञानिषेधएवसंज्ञाशब्देषुजा
तिकार्याभावंज्ञापयति। यद्यपिचोतोगुणवचनादित्यत्रद्रव्यक्रियाजातिभिन्नत्वेसतिद्रव्यसमवेत
त्वंगुणत्वमितिलक्षणंलब्धंश्रूयते। तथापि आकडारसूत्रे गुणवचनमित्युक्त्वा समासकृत्तद्धिताव्य
यसर्वनामासर्वलिङ्गाजातिरेकद्रव्योपनिवेशिनीसंज्ञेतिभाष्यकृतासंज्ञानाम्यौक्षपिर्यपरिगण
नात्समासादीभिन्नत्वमित्यपिलक्षणंलब्धस्यानुरोधाद्बोध्यम्। अतएव ऐक्यमित्यादौ ब्राह्मणादित्वा
त्ष्यञिति कैयटः। पाण्डित्यमित्यत्रतद्धितान्तद्दृढादित्वात्ष्यञ्। आधिपत्यवैषम्यादयोब्राह्मणादित्वा
देवेत्यलम्। यद्यपिकृताकृतप्रसङ्गीविधिर्नित्यइतिकचित्यघ्नतेध्रुवचित्तुशब्दान्तरस्यप्राप्नुवन्वि

घिरनित्य इति तयोरयमाशयः। यद्व्यक्तिसंबन्धितया पूर्वम्प्रसक्तिस्तद्व्यक्तिसंबन्धितयैव पुनःप्राप्तौ कृता
कृतप्रसङ्गित्वन्तदुच्यते। शब्दान्तरस्य प्राप्नुवन्विधिरनित्य इति। एवञ्च न्यायस्य तुल्यत्वात्। शब्दान्तरादवि
प्राप्नुवन्विधिरनित्य इत्येके। वस्तुतस्तु यः शब्दान्तरस्य स्थाने प्राप्तौ स न्यायः। अन्यत्र कृताकृतप्रसङ्गि इ
ति न विवेकुमुचितम्। ननु एकतिङ् वाक्यमिति लक्षणमाश्रित्य तिङ्। तिङ् इति सूत्रे। तिङ्ग्रहणम्भाष्ये प्रत्या
तम्। दश दाडिमाः षडपूपा इत्यर्थकम्वाक्यन्न स्यात इत्यत्र तु भाष्ये अन्यत्रापि कथं वाक्यशब्दः प्रयुज्यते इति
चेत्सत्यम्। अनुवादार्थमेव तद्वाक्यलक्षणम्प्रणीतम्। अन्यत्र तु लौकिकमेव वाक्यम्। राज्ञः पुरुष इत्याद
वसमस्ते तु नानार्थविधया वाक्यशब्दप्रयोग इत्यलम्। तदनुबन्धकग्रहणे नातदनुबन्धकस्येति। एषा
परिभाषा वामदेवाड्ड्यड्ड्याविति डित्करणेन ज्ञापिता। अन्यथा यस्येति लोपेन सिद्धे तद्वैयर्थ्यात्। तेनावाम

देव्यमित्यत्रयययत्तोभ्यात्तदर्थइति।अनेननञःपरस्ययदन्तस्यआद्युदात्तोनभवति।यत्तुपित्तुरिद
म्येत्तकमित्याद्यर्थेनृतत्सृजितिसूत्रेडकम्इतिवाच्येपैत्तकीविद्येत्यत्रडीवर्थंकग्रहणम्।अन्यथाटिड्डे
तिसूत्रेकञ्ग्रहणस्यैवग्रहणंस्यात्।याद्दधीत्यादौककारञकारानुबन्धस्यसत्प्रत्ययस्यकञोग्र
हणन्नस्यात्तदनुबन्धकस्येतिन्यायादित्युक्तम्प्रनोरथ्याम्।तन्न्यायेनानुबन्धेनसानुबन्धकत्वन्तद्नु
च्चारणएवतत्प्रवृत्तेः।शाब्दमर्य्यादयातथैवलाभात्।अतएवजश्शसोःशिरित्यनिरनुबन्धकस्यापि
सद्धितथासोनग्रहणङ्ङिःन्तुसुपएव।अनुबन्धानुच्चारणएवतन्न्यायप्रवृत्तेः।ननुप्रत्ययविधिनाञ्ञा
पितत्वादिदम्याविभावाद्यप्रत्ययविधिविषयमेव।अन्यथात्फञेत्येतन्निरनुबन्धकस्यफञानिष्प
त्तावित्यस्यैवस्यात्।नतुष्फञाविधावलेइत्यस्या।तथाचकथंदिवउत्सूत्रेभाष्यकृतासम्भावितेतिचेन्न।

॥२१॥

प्रत्ययविषयताया औत्सर्गिकत्वात्। अतएवस्यसापरमस्त्वस्येत्यादिसिद्ध्यर्थं ङ्कृहणवतेत्यस्यप्र
त्ययविधिविषयत्वस्वीकारे विशेषोऽव्यस्तवीत्यादावपिसम्यारितः। गोस्त्रियोरित्यत्र व्यपदेशिव
द्भावोऽप्रातिपदिकेनेति सम्यारितः। ननु ष्कन्ध्यासोर्ज्जित्वप्रयुक्तमात्मनेपदङ्कथं ञकारस्य ष्कञ्प्रत्या
हारार्थत्वेन समुदायानुबन्धकत्वात्तथा सःथकारादामिपः पकारस्थप्प्रत्याहारङ्कत्वात्तस्य पान्ता
मइति सूत्रयितव्ये तदकरणं समुदायानुबन्धानामवयवत्वानुबन्धत्वाभावं ज्ञापयति। अत एव व
व्रश्चिमहेइत्यत्र महिङोङकारस्य तङादिप्रत्याहारार्थतयाङित्वाभावान्न सम्प्रसारणमिति चेत्स
त्यम्। गन्धनादिसूत्रानन्तरमानुपराभ्यामिति तत्कृनिषेधे कर्त्यपि ऽनुपराभ्याङ्कृञ इत्युक्तिः स्व
रितञितइत्यस्य प्रप्रत्यर्थात्तेन क्वचिदवयवानुबन्धत्वमपि ज्ञाप्यतइत्यवगम्यानधुमतेत्यत्र प्रत्य

येपरेपूर्वस्यकार्य्यन्नेत्यर्थः।कथन्तर्हिअव्ययस्याङ्गपदाभ्यामपृथग्ग्रहणवैयर्थ्यादित्युभमितिचेत्
अत्राहुः।अव्ययाङ्गसञ्ज्ञकस्येत्यर्थइति।नन्वेवंब्रह्मणएवइत्यत्रानङ्गत्वादल्लोपोनेत्युत्तरग्रन्थास
ङ्गतिरितिचेन्न।यस्मिन्परेभसञ्ज्ञातस्मिन्परेऽङ्गत्वेएवतत्प्रवृत्तेः।इदन्तुनयुक्तम्।हलइति
सिद्धेकारीषगन्धीपुत्रइत्याद्यर्थंसम्प्रसारणस्येतिदीर्घविधानेनाङ्गसञ्ज्ञयाअपिनिषेधज्ञाप
नात्।वस्तुतस्तुपदद्वयाश्रयबहिरङ्गसम्प्रसारणस्यासिद्ध्याकारीषगन्धीपुत्रेहलइत्यस्यन
प्राप्तिः।अङ्गाधिकारस्थङ्कार्यन्नभवतीतिव्याख्यानेतुअहर्ददातीत्यत्ररोऽसुपीतिरत्वानापत्तिः
रत्वस्यानाङ्गत्वेननिषेधानापत्तौप्रत्ययलक्षणेनासुपीतिनिषेधापत्तेः॥ ॥छ॥ ॥इतिश्री
मद्देवीदत्तात्मजरामसेवकतनूद्भवकृष्णाचार्य्यकृतोयुक्तिरत्नाकरस्समाप्तः॥ ॥छ॥ ॥